শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।

ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

শ্রী মেল্পপত্তূর্ নারাযণভট্টতিরি ৱিরচিতম্

# ॥শ্রীমন্নারাযণীযম্॥

## দশক - ৭৭

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using Bengali for TEX.

श्रीः
श्रीमते कृष्णाय परब्रह्मणे नमः
श्रीमते रामानुजाय नमः

# ॥श्रीमन्नारायणीयम् ॥

## दशक - ७७

*उपश्लोकोतपत्तिवर्णनं जरासन्धादियुद्धवर्णनं*
*मुचकुन्दानुग्रहवर्णनं च*

सैरन्ध्र्यास्तदनु चिरं स्मरातुराया यातोऽभूः सुललितमुद्धवेन सार्धम्।
आवासं त्वदुपगमोतसवं सदैव ध्यायन्त्याः प्रतिदिनवाससज्जिकायाः॥ १ ॥

उपगते त्वयि पूर्णमनोरथां
 प्रमदसम्भ्रमकम्प्रपयोधराम्।
विविधमाननमादधतीं मुदा
 रहसि तां रमयाञ्चकृषे सुखम्॥ २ ॥

पृष्टा वरं पुनरसाववृणोद्वराकी
 भूयस्त्वया सुरतमेव निशान्तरेषु।
सायुज्यमस्त्विति वदेत् बुध एव कामं
 सामीप्यमस्त्वनिशमित्यपि नाब्रवीत् किम्॥ ३ ॥

ततो भवान् देव निशासु कासुचिन-
 मृगीदृशं तां निभृतं विनोदयन्।
अदादुपश्लोक इति श्रुतं सुतं
 स नारदात् सात्वततन्त्रविद् बभौ॥ ४ ॥

अक्रूरमन्दिरमितोथ बलोद्धवाभ्या-
 मभ्यर्चितो बहु नुतो मुदितेन तेन।
एनं विसृज्य विपिनागतपाण्डवेय-
 वृत्तं विवेदिथ तथा धृतराष्ट्रचेष्टाम्॥ ५ ॥

विघातज्जामातुः परमसुहृदो भोजनृपते-
 र्जरासन्धे रुन्धत्यनवधिरुषान्धेथ मथुराम्।

রথাদ্যৈর্দোর্লব্ধৈঃ কতিপযবলস্ত্বং বলযুত-
স্ত্রযোৱিংশত্যক্ষৌহিণি তদুপনীতং সমহৃথাঃ॥ ৬ ॥

বদ্ধং বলাদথ বলেন বলোত্তরং ত্বং
ভূযো বলোদ্যমরসেন মুমোচিথৈনম্।
নিশশেষদিগজযসমাহৃতৱিশ্বসৈন্যাত্
কোন্যস্ততো হি বলপৌরুষৱাংস্তদানীম্॥ ৭ ॥

ভগ্নঃ স লগ্নহৃদযোপি নৃপৈঃ প্রণুন্নো
যুদ্ধং ত্বযা ৱ্যধিত ষোডশকৃত্ব এৱম্।
অক্ষৌহিণীঃ শিৱ শিৱাস্য জঘন্থ ৱিষ্ণো
সম্ভূয সৈকনৱতিত্রিশতং তদানীম্॥ ৮ ॥

অষ্টাদশেস্য সমরে সমুপেযুষি ত্বং
দৃষ্টৱা পুরোথ যৱনং যৱনত্রিকোট্যা।
ত্বষ্ট্রা ৱিধাপ্য পুরমাশু পযোধিমধ্যে
তত্রাথ যোগবলতঃ স্বজনাননৈষীঃ॥ ৯ ॥

পদভ্যাং ত্বং পদ্মমালী চকিত ইৱ পুরান্নির্গতো ধাৱমানো
ম্লেচ্ছেশেনানুযাতো ৱধসুকৃতৱিহীনেন শৈলে ন্যলৈষীঃ।
সুপ্তেনাংঘ্র্যাহতেন দ্রুতমথ মুচুকুন্দেন ভস্মীকৃতেস্মিন্
ভূপাযাস্মৈ গুহান্তে সুললিতৱপুষা তস্থিষে ভক্তিভাজে॥ ১০ ॥

ঐক্ষৱাকোহং ৱিরক্তোস্ম্যখিলনৃপসুখে ত্বতপ্রসাদৈককাঙ্ক্ষী
হা দেৱেতি স্তুৱন্তং ৱরৱিততিষু তং নিস্পৃহং ৱীক্ষ্য হৃষ্যন্।
মুক্তেস্তুল্যাং চ ভক্তিং ধুতসকলমলাং মোক্ষমপ্যাশু দত্বা
কার্যং হিংসাৱিশুধ্যৈ তপ ইতি চ তদা প্রাত্থ লোকপ্রতীত্যৈ॥ ১১ ॥

তদনু মথুরাং গত্বা হত্বা চমূং যৱনাহৃতাং
মগধপতিনা মার্গে সৈন্যৈঃ পুরেৱ নিৱারিতঃ।
চরমৱিজযং দর্পাযাস্মৈ প্রদায পলাযিতো
জলধিনগরীং যাতো ৱাতালযেশ্বর পাহি মাম্॥ ১৩ ॥

**********